5th Semester BA (CBCSS)

Core Course in Sanskrit Special Vedanta

CODE V छान्दोग्योपनिषत् षष्ठोऽध्यायः (शाङ्करभोष्योपेतः)

Sample question paper (1)

सूचना - संस्कृतभाषया उत्तराणि देयानि। देवनागरीलिपिरुपयोक्यव्या।

I. **पदेनैकेन उत्तरं लिखत।** 1-16

1. आरुणेयः कः?
2. वाचारम्भणमित्यस्य कोऽर्थः?
3. किमेकमेव अग्रे आसीत्?
4. भूतानां कति बीजानि भवन्ति?
5. पीतानामपामणिष्ठः अंशः कः भवति?
6. वाक् कीदृशी भवति?
7. अशनायः इति कः उच्यते?
8. पीतं किं नयति?
9. प्रयतः पुरुषस्य मनः कुत्र लीयते?
10. इमाः प्रजाः कुत्र सम्पद्यन्ते?
11. काः सन्ति प्रतीच्याः नद्यः?
12. विद्यमानवस्तुनः अनुपलब्धौ प्रकारान्तरेणोपलब्धौ कः दृष्टान्तः?
13. सत्सम्पन्नस्य अनावृत्तौ इतरस्य आवृत्तौ च कः दृष्टान्तः?
14. छान्दोग्योपनिषत् केन वेदेन संबद्धा भवति?
15. एकमेवाद्वितीयं किमासीत्?
16. आण्डजभूतानामेकं दृष्टान्तं लिखत।

II. **वाक्येन वाक्याभ्यां वा पश्नानामुत्तरं लिखत** – (17-24)

17. पितापुत्राख्यायिका किमर्था?
18. असदेवेति वाक्यं किमर्थं प्रयुक्तम्?
19. अद्भ्यः अन्नं जायते इति कथं ज्ञायते?
20. जीवजमिति किमुच्यते?

21. तेज आदीनां सृष्ट्यनन्तरं सदाख्या देवता किमैक्षत?

22. पुरुषेण अशितमन्नं कथं त्रेधा विभज्यते?

23. पुरुषेण भुक्तं तेजः कथं त्रेधा विभज्यते?

24. पुरुषः कथं स्वपिति इत्युच्यते?

III. **चतुर्णामुत्तरं लघूपन्यासरूपेण लिखत**

25. षष्ठोऽध्यायः छान्दोग्ये कुतः आरभ्यते?

26. प्रधानस्य जगत्कारणतामाशङ्क्य निराकुरुत।

27. मधुकृद्दृष्टान्तं विशदयत।

28. न्यग्रोधफलदृष्टान्तमुपपादयत।

29. मुमूर्षुपुरुषदृष्टान्तं लिखत।

30. एकविज्ञानेन सर्वविज्ञाने दृष्टान्तान् प्रदर्शयत।

IV. **द्वौ उपन्यसत**

31. पूर्वपक्षनिरसनपुरस्सरं सृष्टिपूर्वकाले जगतः सद्रूपतां समर्थयत।

32. सुषुप्तौ जीवावस्थां प्रदर्शयत।

33. त्रिवृत्करणे दृष्टान्तान् यथाग्रन्थमुपपादयत।

**Answers and keys**

उपयुक्तग्रन्थः - छान्दोग्योपनिषत् शाङ्करभाष्यम् -गीताप्रेसे गोरखपूर् 11th edition

**I.**

1. श्वेतकेतुः।
2. वागालम्बनम्।
3. सदेव।
4. त्रीणि।
5. प्राणः।
6. तेजोमयी।
7. आपः।
8. तेजः।
9. प्राणे।
10. सति।
11. सिन्ध्वाद्याः।
12. लवणदृष्टान्तः।

13. तप्तपरशुग्रहणदृष्टान्तः।

14. सामवेदेन।

15. सत्।

16. पक्ष्यादि।

II.

17. विद्यायाः सारिष्ठत्वप्रदर्शनाय।

18. पुरुषस्य विपरीतग्रहणनिवृत्त्यर्थम्।

19. यत्र च क्व च वर्षति तदेव भूयिष्ठमन्नं भवति।

20. जरायुजं पुरुषपश्वादि।

21. हन्ताहमिमास्तिस्रो देवता अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि इति ऐक्षत।

22. यः स्थविष्ठो धातुः तत् पुरीषम्, यो मध्यमः तन्मांसं, योऽणिष्ठः तन्मनश्च भवति।

23. तेजसः स्थविष्ठः धातुः अस्थि, यः मध्यमः सः मज्जा, योऽणिष्ठः सा वाक्च।

24. यदा सता सम्पन्नो भवति तदा पुरुषः स्वं ह्यपीतः भवति इत्यतः स्वपिति इति उच्यते।

III.

25. तज्जत्वात् तल्लत्वात् तदनत्वात् च ब्रह्मणः सर्वात्मकत्वमिति पञ्चमे उक्तम्। तदेव सर्वात्मकत्वमत्र प्रदर्श्यते।

26. गौणमीक्षणमचेतने प्रधाने भवेदिति आशङ्का। आत्मशब्दोपदेशात् गौणमीक्षितृत्वं न सम्भवतीति समाधानम्।

27. प्रजाः अहनि सत्सम्पद्य सत्सम्पन्ना इति कुतो न विदन्ति इति आशङ्कायां मधुकृद्दृष्टान्तः। यथा मधुकृतः भिन्नवृक्षेभ्यः रसान् स्वीकृत्य मधुरूपेण एकतां नयन्ति तदा अयमस्य वृक्षस्य रस इति न प्रत्यभिजानन्ति तद्वत् प्रजाः सत्सम्पन्ना अपि तत् न विदन्ति।

28. सूक्ष्मात्सतः कथं स्थूलप्रपञ्चोत्पत्तिः इति प्रदर्शयितुमयं दृष्टान्तः। यथा सूक्ष्मात् अणुतरात् न्यग्रोधबीजात् स्थूलवटोत्पत्तिः तथैव सूक्ष्मात्सतः स्थूलप्रपञ्चो जायते।

29. विदुषः सत्सम्पत्तिक्रमं दर्शयितुं मुमूर्षुपुरुषदृष्टान्तं प्रदर्शयति। यथा मुमूर्षुं ज्ञातयः पर्युपसते तद यावत् तेजः परस्यां देवतायां न सम्पद्यते तावदयं जानाति। अत्र वाक् मनसि, मनः प्राणे, प्राणः तेजसि, तेजः परस्यां देवतायामिति लयक्रमः।

30. मृत्पिण्डे विज्ञाते मृण्मयविज्ञानम्। एकेन लोहमणिना विज्ञातेन लोहमयविज्ञानम्। एकेन नखनिकृन्तनेन कार्षाणयसविज्ञानम्। एवं कारणविज्ञानेन कार्यविज्ञानम्।

IV.

31. सदेव सोम्येदमग्रआसीत्। तत्र असदेवेति पूर्वपक्षः। तदिदं वैनाशिकमतमत्र निरस्यते।

32. सुषुप्तौ पुरुषस्य स्वपितीति नाम। स्वं हि अपीतः - स्वस्मिन् लीनः भवति इत्यर्थः। सूत्रेण बद्धः शकुनिः अन्यत्रायतनमलब्ध्वा बन्धनमेव यथा आश्रयते तथा मनः दिशं दिशं पतित्वा अन्यत्रायतनमलब्ध्वा प्राणमेव आश्रयते। तस्मान्मनः प्राणबन्धनमुच्यते। अन्नस्य मूलमापः, अपां मूलं तेजः, तेजसः मूलं सदिति निश्चयः।

33. एकैकं भूतं कथं त्रिवृत् भवतीति प्रदर्श्यते। अग्नेः रोहितं रूपं तत् तेजसः, शुक्लमपां कृष्णमन्नस्य च भवति। एवमादित्यस्य विद्युतः च दृष्टान्ताः प्रदर्शिताः।